**अयोगवः** पु० अय इव कठिना गौर्वाणी यस्य नि० अच्। अयोगं दुष्टयोगं वाति वा—क वा। "शूद्रादयोगवःक्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्ण-सङ्कराः इति मनूक्ते शूद्रात् वैश्यायां जाते प्रतिलोमजे सङ्कीर्णवर्णे। "प्रसाधनोपचारज्ञमदासं दासजीवनम् सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे, मनुः। अयो-गवस्यायम् अण्। आयोगवः तज्जातिसम्बन्धिनि त्रि० स्त्रियां ङीप्। "भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः" मनुः।

**अयोगवाह** पु० अक्षरसमाम्नायसूत्रेषु "अइउण्" इत्यादिषु चतुर्दशसु नास्ति योगः पाठादिरूपः संबन्धो येषां ते तथापि वाहयन्ति षत्वणत्वादिकार्य्यादिकं निष्पादयन्ति वाहेः अच् कर्म्मधा०। "अनुस्वारो विसर्गश्च+क्‍ँ पौ चैव पराश्रितौ। अयोगवाहाविज्ञेया" इति शिक्षोक्त-दुपदिष्टेषु अनुस्वारविसर्गादिषु

**अयोगुल** (ड) पु० गुलः गोलाकारः अयसा निर्म्मितोगुलः। (गोलीति) ख्याते लौहगुटिकायाम्। बा लस्य डः।

**अयोगू** पु० अयोलोहविकारं गच्छति कर्त्तृत्वेन गम—ला० डू। अयोगन्तरि अयस्कारे "पाप्मने क्लीवमाक्रियाया अयोगूमिति"। पुरुषमेधे यजु० ३०५ 'अयोगूमयो-गन्तारम्। वेद दी०।

**अयोग्य** त्रि० न०त०। १योग्यभिन्ने अनर्हे २अनुचिते च।

**अयोऽग्र** न० अयोऽग्रे मुखे यस्य। मुषले तस्य मुखे लौहा-वस्थित्या तथात्वम्।

**अयोघन** पु० अयांसि हन्यन्तेऽनेन हन-अप् घादेशश्च नि०। (हातुड़ीति) ख्याते लौहमुद्गरे। 'अयोघनेनाय इवाभितप्तम्" ॥ रघुः।

**अयोजाल** न० अयोविकारः जालम्। १लौहमये जाले अय इव दुर्भेद्यं जालं मायाऽस्य। २दुर्भेद्यकपटे असुरादौ त्रि० "अयोजाला असुरा मायिनोऽयस्मयैः" अथ० १,१८,६६।

**अयोदंष्ट्रा** त्रि० अयोमयी दंष्ट्रा चक्राग्रधारा अस्य। लौह-मयधारे रथादौ। "पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधा-वतो वराहून्" ऋ० १,८८,६, "दंष्ट्रा चक्रधारा" भा०।

**अयोदत्** त्रि० अय इव कठिनो दन्तोयस्य संज्ञायां दता-देशः। लौहवत्कठिनदन्तयुक्ते राक्षसादौ स्त्रियां ङीप्।

**अयोध्य** त्रि० योद्धुमशक्यः युध—ण्यत् न०त०। योद्धुमशक्ये "अष्टाचक्रा नवद्वारा देवानां पूरयोध्या" अथ० १०, २,३१, इक्ष्वाकुवंश्यनृपाणां राजधान्यां स्त्री सा च सरयू-तीरसन्निकृष्टा सेवनादौ मोक्षदा च। "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" पुरा० "बलमुपहितशोभां तूर्णमायादयोध्याम्" भट्टिः।

**अयोध्याकाण्ड** न० अयोध्यायास्तत्रत्यवृत्तान्तवर्णनस्य काण्डम्। रामायणान्तर्गते अयोध्यावर्णनात्मके ग्रन्थे।

**अयोनि** स्त्री न०त०। १योनिभिन्नस्थाने। "अमानुषीषु पुरुषे उदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्" मनुः। नास्ति योनिरुत्पत्तिस्थानं यस्य। २अजन्ये नित्ये। "जगद्योनिरयोनिस्त्वम्" कु०।

**अयोनिक** त्रि० न आम्नाता योनिरस्य कप्। अनाम्नात योनिकेषु ग्रहरूपयज्ञपात्रादौ "नायोनिकेषु" कात्या० ८,५,२२, अयोनिकेषु यत्र "एष ते योनिः" इत्यस्याम्नानं न भवति तत्र "एष ते योनिः" इत्यनेनासादनं भवति "सर्वे ष्विति वात्स्योऽविशेषात्" कात्या० ८,५,२७ "सर्वेष्वाम्नात योनिकेषु अनाम्नातयोनिकेषु च ग्रहेषु परिमार्जनानन्तरम् एष ते योनिरिति मन्त्रेणासादनं भवत्येव" कर्क०।

**अयोनिज** न० योनेर्न जायते जन—ड। योनितोऽनुत्पन्ने-शुक्रशोणितसन्निपाताऽनुत्पन्ने जरायुजभिन्ने कृमिदंशादौ तथाहि "शरीरं द्विविधं योनिजमयोनिजञ्च" वै० सू०। तत्र पार्थिवादिशरीरेषु मध्ये पार्थिवं शरीरं द्विविधं योनिजमयोनिजञ्चेति आप्यतैजसवायवीयशरीराणां वरुणादित्यवायुलोकेषु प्रसिद्धानामयोनिजत्वमेव शुक्रशो णितसन्निपातानपेक्षत्वात्। अयोनिजञ्च देवानामृषी-णाञ्च श्रूयते हि "ब्रह्मणो मानसामन्वादय" इति। कारण-मन्तरेण कथं कार्य्यमिति चेत् योनेः शरीरत्वावच्छे-देनाकारणत्वात् उष्मजकृमिमशकादिशरीरे व्यभिचारात् संस्थानविशेषवत्त्वस्य चासिद्धेः देवर्षिशरीरापेक्षयाऽस्मदादि-शरीराणामन्यादृशत्वात्, योनिजमपि द्विविधं जरायुजम-ण्डजञ्च, जरायुजं मानुषपशुमृगाणां, गर्भाशयस्य जरायु-त्वात्, पक्षिसरीसृपाणामण्डजं परितः सर्पणशीलत्वात् सर्पकीटमत्स्यादयोऽपि सरीसृपा एव यद्यपि वृक्षादयोऽपि शरीरभेदा एव भोगाधिष्ठानत्वात् न खलु भोगाधिष्ठानत्व-मन्तरेण जीवन-मरण-स्वप्न-जागरणभेषज-प्रयोग-वीजस-जातीयानुबन्धानुकूलोपगम-प्रतिकूलापगमादयः सम्भवन्ति छिन्नक्षतभग्नसंरोहणे च भोगोपपादके स्फुटे एव, आगमो-ऽप्यस्ति। "नर्म्मदातीरसम्भूताः सरलार्ज्जुनपादपाः। नर्म्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम्"।